**संस्कृत-वार्ता:**

**दिनाङ्क :-26.09.2024**

**प्रात: - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री-महाराष्ट्र**

**प्रधानमन्त्री नरेन्द्र मोदी अद्य महाराष्ट्रस्य पुणे नगरस्य यात्रायां भविष्यति। सः षड्शतोत्तर द्वाविंशतिः सहस्र कोटिरूप्यकाणां विविधानां परियोजनानां उद्घाटनं, आधारशिलां च स्थापयिष्यति। श्रीमोदी जनपद-न्यायालयात् पुणेनगरस्य स्वर्गेटं प्रति मेट्रोरेलयानं हरित ध्वजं प्रदर्शयिष्यति। सुपरकम्प्यूटिंग-प्रौद्योगिक्याः क्षेत्रे भारतं स्वावलम्बनं कर्तुं स्वस्य प्रतिबद्धतायाः अनुरूपं प्रधानमन्त्री राष्ट्राय सुपरकम्प्यूटिंग्-मिशन इत्यस्य अन्तर्गतं स्वदेशे विकसितानां प्रायः त्रिंशदधिकैकशत कोटिरूप्यकाणां व्ययेन निर्मितानां त्रीणि परम-रुद्र-सुपरकम्प्यूटर्-इति संगणकान् समर्पयिष्यति । प्रधानमन्त्री श्रीमोदी ऋतु विभागस्य जलवायुसंशोधनस्य च अनुरूपं उच्चप्रदर्शनकम्प्यूटिंग् प्रणाल्याः अपि उद्घाटनं करिष्यति। परियोजना सार्द्ध अष्टशत कोटिरूप्यकाणां व्ययेन निर्मितास्ति, ऋतुविज्ञान विभागस्य अनुप्रयोगानाम् कृते भारतस्य गणनाक्षमतायां विशिष्ट योगदानं भविष्यति।**

**प्रिज - सियाचेन् :**

**राष्ट्रपति पदासीना द्रौपदी मुर्मू अद्य सियाचिन् आधारशिबिरस्य भ्रमणं करिष्यति। भ्रमणकाले राष्ट्रपतिः तत्र नियुक्तैः सैनिकैः सह संवादं अपि करिष्यति।**

**जम्मू-कश्मीरः**

जम्मू-कश्मीरे ह्यः द्वितीयचरणस्य विधानसभानिर्वाचने सप्तवादनपर्यन्तं चतुःपञ्चाशत्- दशमलव एकादश प्रतिशतं मतदानं जातम्। उत्साहि-मतदातॄणां दीर्घाः पङ्क्तयः स्वस्य मताधिकारस्य प्रयोगाय सिद्धाः दृष्टाः। केन्द्रशासितप्रदेशस्य षट्मण्डलेषु षड्विंशतिः विधानसभाखण्डेषु सर्वेषु द्वि-अधिक-पञ्चशतोत्तर-त्रिसहस्रं मतदानकेन्द्रेषु कठिन-सुरक्षा-व्यवस्थानां मध्ये मतदानं प्रातः सप्तवादने आरब्धम्। अस्मिन् चरणे, एकोन-चत्वारिंशदुत्तर-द्विशतम् अभ्यर्थीनां भाग्यस्य निर्णयं प्रायः पादोन-षड्विंशति-लक्षं मतदातारः कृतवन्तः।

<u>प्रधानमन्त्री-हरियाणा-निर्वाचनम्</u>

हरियाणाविधानसभानिर्वाचनाय प्रचाराभियानम् सजवं प्रवर्तते। प्रधानमन्त्री तथा भाजपा दलस्य वरिष्ठः नेता नरेन्द्रमोदी ह्यः सोनीपतस्य गोहानायां द्वाविंशतिः विधानसभा-क्षेत्राणां दलस्य अभ्यर्थिनः पक्षे जनाशीर्वाद-सभां सम्बोधितवान् । अस्मिन् अवसरे श्रीमोदी एनडीए-सर्वकारेण समारब्धस्य मेक इन इण्डिया-उपक्रमस्य लाभान् प्रकाशितवान् ।

प्रधानमन्त्री अवदत् यत् हरियाणा-भाजपासर्वकारस्य कार्यकाले उद्योग-कृषि इत्यादिषु क्षेत्रेषु हरियाणा राज्येण शीर्षराज्येषु स्वस्थानं संरक्षितम् अस्ति। सः अवदत् यत् राज्ये भाजपायाः समर्थनं प्रतिदिनं वर्धमानम् अस्ति। कुरुक्षेत्रे भाजपायाः वरिष्ठः नेता तथा केन्द्रीयमन्त्री नितिन गडकरी जनसभाम् सम्बोधितवान्। भारतीय राष्ट्रीय लोकदलेन ह्यः पूर्व उपप्रधानमंत्री चौधरी देवीलाल वर्यस्य जयंत्यवसरे जिन्द मण्डलस्य जुलानायां जननायक सम्मान इति पथ प्रदर्शन्याः आयोजनं कृतम्। बहुजन समाज पार्टीति दलस्य प्रमुखा मायावती, शिरोमणि अकाली दलस्य च प्रमुखः सुखबीर बादलः अपि आई.एन.एल.डी नेतृभिः सह सभां सम्बोधितवन्तः। आम आदमी पार्टीति दलस्य राष्ट्रिय संयोजकः अरविन्द केजरीवालः अपि मेहम् इत्यत्र जनसभां सम्बोधितवान्। नवति सदस्यानां

हरियाणाविधानसभायाः मतदानं अक्टोबर् मासस्य पञ्चमे दिनाङ्के भविष्यति, तत्रैव मतदानस्य गणना अक्टोबर् मासस्य अष्टमे दिनाङ्के भविष्यति।